## सञ्ज्ञायाम् । (१५९/३८९३)

आक्रोशे गम्यमाने नञः परमुत्तरपदं सञ्ज्ञायां वर्तमानमन्तोदात्तं भवति । अदेवदत्तः । अयज्ञदत्तः । अविष्णुमित्रः ॥

## कृत्योकेष्णुच्चार्वादयश्च । (१६०/३८९४)

कृत्य उक इष्णुच् इत्येवमन्ताश्चार्वादयश्च नञः [1]उत्तरेऽन्तोदात्ताः भवन्ति । कृत्य – अकर्तव्यम् । अकरणीयम् । उक – अनागामुकम् । अनपलाषुकम् । इष्णुच् – अनलङ्करिष्णुः । [2]अनिराकरिष्णुः । इष्णुज्ग्रहणे 'कर्तरि भुवः खिष्णुच्' (३.२.५७/२९७४) इत्यस्य द्वचनुबन्धकस्यापि[3] ग्रहणमिकारादेर्विधानसामर्थ्याद् भवति । अनाढचम्भविष्णुः । [4]असुभगम्भविष्णुः । चार्वादयः – अचारुः । असाधुः । अयौधिकः । अवदान्यः ।

चारु । साधु । यौधिक । अनङ्गमेजय । अत्र द्वितीये नञ्समासेऽन्तोदात्तत्वम् । अनङ्गमेजयः । वदान्य । [5]अकस्मात् । अत्रापि द्वितीये नञ्समासेऽन्तोदात्तत्वम् । अनकस्मात् । 'वर्तमानवर्धमानत्वरमाणध्रियमाणरोचमानशोभमानाः सञ्ज्ञायाम्' (ग.सू. १७२) । एते वर्तमानादयः सञ्ज्ञायां द्रष्टव्याः । 'विकारसदृशे व्यस्तसमस्ते' (ग.सू. १७३) । अविकारः । असदृशः । अविकारसदृशः । गृहपति । गृहपतिक । 'राजाह्लोश्छन्दसि' (ग.सू. १७४) । अराजा । अनहः । भाषायां नञ्स्वर एव भवति ॥

## विभाषा तृन्नन्नतीक्ष्णशुचिषु । (१६१/३८९५)

तृन्नन्त अन्न तीक्ष्ण शुचि [6]इत्येतेषु नञ उत्तरेषु विभाषा अन्तः उदात्तो भवति । तृन् – अकर्ता, अकर्ता । अन्न – अनन्नम्, अनन्नम् । तीक्ष्ण – अतीक्ष्णम्, अतीक्ष्णम् । शुचि – अशुचिः, अशुचिः । [7]पक्षेऽव्ययस्वर एव भवति ॥

## बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने । (१६२/३८९६)

बहुव्रीहौ समासे इदम् एतद् तद् इत्येतेभ्यः उत्तरस्य प्रथमशब्दस्य पूरणप्रत्ययान्तस्य च क्रियागणने वर्तमानस्यान्तः उदात्तः भवति । इदं प्रथमं गमनं भोजनं वा यस्य स इदंप्रथमः । इदंद्वितीयः । इदंतृतीयः । एतत्प्रथमः । एतद्द्वितीयः । एतत्तृतीयः । तत्प्रथमः । तद्द्वितीयः । तत्तृतीयः । बहुव्रीहौ इति किम् । अनेन प्रथमः इदंप्रथमः[8] । तृतीया इति योगविभागात् समासः । इदमेतत्तद्भ्यः इति किम् ? यत्प्रथमः । प्रथमपूरणयोः इति किम् ? तानि बहून्यस्य तद्बहुः । क्रियागणने इति किम् ? अयं प्रथम एषां ते इदंप्रथमाः । द्रव्यगणनमेतत् । गणने इति किम् ? अयं प्रथम एषां ते इदंप्रथमाः । इदम्प्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात् कपि पूर्वम् (६.२.१७३/३९०७) अन्तोदात्तं भवति । इदंप्रथमकाः[9] । बहुव्रीहौ इत्येतत् 'वनं समासे' (६.२.१७८/३९१२) इति प्रागेतस्मादधिकृतं वेदितव्यम् ॥

---

1. उत्तराः फ. 2. अनिराकरिष्णुः नास्ति फ. 3. अपि नास्ति फ. 4. असुभगंभरिष्णुः नास्ति फ. 5. अनुकरणात् क.ड.फ. 6. इत्यन्तेषु फ. 7. वाक्यमिदं नास्ति फ. 8. पाकः इत्यधिकम् ह, नास्ति क. 9. इदंद्वितीयकाः इत्यधिकम् ह.